साहित्य शास्त्री-I

अभिज्ञानशाकुन्तलम्
चतुर्थोऽङ्कः

Date ___/___/___

प्र० (1) - पद्यमिदम् व्याख्येयम् ।

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै -
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तल नाट्यशास्त्रस्य चतुर्थोऽङ्कात् उद्धृतोऽस्ति। अस्मिन् श्लोके मुनिकुमारकोपनीतान्याभरणानि विलोक्य कुत एतानि प्राप्तानीति गौतम्या पृष्टौ मुनिकुमारकौ कथयतः - केनचित् तरुणा = केनापि वृक्षेण इन्दुपाण्डु इन्दुवत = चन्द्रवत् पाण्डु श्वेतं चन्द्रधवलं माङ्गल्यं मङ्गले = मंगलकर्मणि साधु मंगलप्रयोजकम् शुभकर्मयोग्यं क्षौमं = अंशुकम् आविष्कृतम् = प्रकटीकृतम् दत्तम् केनचित् = केनापि तरुणा च चरणोपभोगसुलभः = चरणलेपनमनोहरः लाक्षारसः = आलक्तकद्रवः निष्ठ्यूतः = उद्गीर्णः आविष्कृतः दत्तः। अन्येभ्यः = अन्य तरुभ्यः, तत्किसलयोद्भेदप्रतिद्वन्द्विभिः = तत्पल्लवशोभानुकारिभिः पर्वणः करमूलस्य भागः = अंशः पर्वत भाग प्रदेशः तं मर्यादीकृत्य आपर्वभागम्, उत्थितैः = उद्धृतैरिति आपर्वभागोत्थितैः = मणिबन्धपर्यन्तं बहिर्निःसृतैः वनदेवताधिष्ठात्रीणां, वनदेवता करतलैः = वन देवापाणितलैः आभरणानि = मुक्तारत्नालंकाराणि, दत्तानि = आवयोर्हस्ते समर्पितानि न तु भूमौ पतितानि तेषां परित्यानायोग्यत्वात् ।

Renu Devi
25/08/20
राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णियाँ ।

Page No.

उपशास्त्री -I साहित्य - तृतीय - पत्र

काव्यदीपिका -

Saathi

Date ___/___/___

प्र०(1)- चूलिकायाः किं स्वरूपम् ?

उत्तरम् - जवनिकान्तरदेशस्थितैः पात्रैः वस्तुविशेषस्य सूचना चूलिका कथ्यते। यथा वीरचरिते चतुर्थाङ्कस्यादौ (नेपथ्ये) भो भो वैमानिकाः। प्रवर्तन्तां रङ्गमङ्गलानि इत्यादि। रामेण परशुरामो जितः' इति नेपथ्ये पात्रैः सूचितम्

प्र० (2) - अङ्कावतारस्य किं स्वरूपम् ?

उत्तरम् - यस्य कस्यचिदङ्कस्य अन्ते पात्रैस्तदङ्काभिन्नत्वेन कथ्यते। यथा - अभिज्ञानशाकुन्तलनाटके पञ्चमाङ्के पात्रैः सूचितः षष्ठोऽङ्कः तदङ्कस्याङ्गविशेष इवावतीर्णः।

प्र० (3) - पताकायाः किं स्वरूपम् ?

उत्तरम् - व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते। या प्रासङ्गिक कथा सुदूरं निर्वहणसन्धिपर्यन्तं स्थायिनी सा पताकेति कथ्यते। यथा - रामचरिते सुग्रीवादेः, वेणीसंहारे भीमादेः शाकुन्तले विदूषकस्य चरितम् 'पताका' इति।

Renu Devi
25/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

साहित्य - उपशास्त्री अष्टम शिखा    तृतीय - पत्रम्

काव्यदीपिका  अर्थान्तरन्यासः - अलंकारः

Saathi

Date ___/___/___

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥

अर्थान्तरन्यासमलङ्कारं लक्षयति - यत्र = यस्मिन् अलंकारे, सामान्यं = साधारणतया घटितम्, विशेषः = सामान्यो निशिष्टो वा साधर्म्येण = समानधर्मत्वेन, तदन्येन = सामान्यप्रतियोगिविशेषेण, इतरेण = वैधर्म्येण यत् समर्थ्यते = प्रमाणी क्रियते, पोष्यते स किञ्चित् समर्थयितुम् अर्थान्तरस्य = प्रस्तुतादन्यस्यार्थस्य न्यासः = स्थापनं यत्र असौ अर्थान्तरन्यासो नामकालंकारो भवति । स च साधर्म्येण वैधर्म्येण च विशेषद्वारा सामान्यसमर्थनमिति द्विविधः, तथा पुनः साधर्म्येण वैधर्म्येण च सामान्यद्वारा विशेषेण समर्थनमिति मिलित्वा चतुर्विधोऽर्थान्तरन्यासः। यथा-

बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥

Renu Devi
25/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

साहित्य शास्त्री-II

रत्नावली

प्र०(1) - पद्यमिदम् व्याख्येयम् ।

जितमुडुपतिना नमः सुरेभ्यो द्विजवृषभा निरुपद्रवा भवन्तु ।
भवतु च पृथिवी समृद्धसस्या प्रतपतु चन्द्रवपुर्नरेन्द्र चन्द्रः ॥

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि श्रीहर्ष वर्धन प्रणीतस्य रत्नावली नाटिकायाः प्रथमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके एतच्चतुर्थं श्लोकं माङ्गलिकं कविरवतारयति — उडुपतिना — उडूनाम् = नक्षत्राणाम् पतिः = स्वामी, तेन चन्द्रेण । (तारकाप्युडु वा स्त्रियाम्, इत्यमरः)

अत्र लाक्षणिकया चन्द्रवंशीयेन श्रीहर्षेणेत्यर्थः । जितम् = सर्वोत्कर्षेण वर्तितम् । सुरेभ्यः = देवेभ्यः । नमः = नमस्कारः । द्विजवृषभाः - द्विजा वृषभा इवेति = ब्राह्मणश्रेष्ठाः । निरुपद्रवाः = उपद्रव - रहिताः । भवन्तु = सन्तु । पृथ्वी = भूमिः । समृद्धसस्या - समृद्धं सस्यं यस्यां सा = प्रभूतश्रीआदियुक्ता भवतु = जायताम् । नरेन्द्र चन्द्रः - नरेन्द्रः चन्द्र इवेति = नृपतिः । चन्द्रवपुः - चन्द्र इव वपुः यस्य सः = चन्द्रवदाह्लादकरः सन् अपि । प्रतपतु = प्रतापं प्रकटयतु । अत्र उपमालङ्कारः । पुष्पिताग्रा - वृत्तम् । तद्यथा - अयुजि न युगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति ।

Renu Devi
25/08/20

शाखा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया